# पाठ-२६(ब)
# संस्कृतस्य प्रयोजनमूलकता

**सारान्शः**
संस्कृतं तु विश्वस्य प्राचीनतमा भाषा। अस्याः भाषायाः विपुलं साहित्यम्, विशालः शब्दभण्डारः, ज्ञानकोषः च । ऋक् - यजुः-साम-अथर्ववेदाः विश्वस्य प्राचीनतमाः ग्रन्थाः। वेदस्य षडङ्गानि शिक्षा - कल्प-निरुक्त-व्याकरण-छन्दः-ज्योतिषम् । व्याख्याग्रन्थाः ब्राह्मण-आरण्यकादयः, वेदान्तग्रन्थाः उपनिषदादयः। सर्वम् एतत्तु वैदिकं साहित्यम्। अष्टादशपुराणानि, रामायणम्, महाभारतम्, नीतिकाव्यानि, कथा ग्रन्थाः, निघण्टु (वैदिकशब्द कोषः), अमरकोशः (लौकिकसंस्कृतशब्दकोषः) संस्कृतसाहित्यस्य अद्भुतानि रत्नानि।

**वैज्ञानिक स्वरूपम्-**
आयुर्वेद - गणित- खगोलविज्ञानादि विषयाः वैज्ञानिक स्वरुपाः सन्ति।
**आयुर्वेद-** 'शल्यचिकित्साजनक: सुश्रु तानुसारम् आयुर्वेदे "शस्त्राणि षट्प्रकाराणि सन्ति तद्यथा स्वास्तिकयन्त्राणि, सन्दंशयन्त्राणि, तालयन्त्राणि, नाडीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति । यन्त्राणां मुखानि मृगपक्षिणां मुखैः सदृशानि भवन्ति।"
**गणितम्-** आर्यभट्ट: महान् गणितज्ञः आसीत्। तेन वृत्तस्य, त्रिभुजस्य, चतुर्भुजस्य, समभुवः च सिद्धिप्रकारम् उपवर्णितम् अस्ति।
वृत्तं भ्रमेण साध्यं त्रिभुजञ्च चतुर्भुजञ्च कर्णाभ्याम् । साध्याजलेन समभूश्च ऊर्ध्वं लम्बकेनैव ।। (आ. भ. 2/13)
**खगोलविज्ञानम्-** अस्माकं ज्योतिषशास्त्रे नक्षत्राणां गणना, सूर्य-चन्द्र-मंगल बृहस्पति-शनि ग्रहाणां स्थितिः, पृथिव्याः दूरत्वं, पृथिव्याः गतिः,सूर्य-चन्द्रग्रहणकालः सर्वं खगोलसम्बन्धिचिन्तनं वर्तते ।

**व्यवसायात्मिकानि संस्कृतस्यक्षेत्राणि-**
अध्यापनम् - संस्कृतज्ञानां कृते विद्यालय - महाविद्यालय - विश्वविद्यालयेषु अध्यापनस्य पर्याप्तः अवसरः । तेषां कार्यक्षेत्रं राजकीयसंस्थासु व्यक्तिगतसंस्थासु च सम्मानजनकम्। जीवननिर्वाहाय उत्तमा सेवावृत्तिः ।

**प्रशासनिक सेवा-** भारतसर्वकारस्य सर्वोच्च प्रशासनिक सेवा आइ.ए.एस. भवति । संस्कृतज्ञः तु संस्कृतं विकल्पविषयरूपेण स्वीकृत्य तत्परीक्षाम् उत्तीर्य 'भारतीय प्रशासनिक अधिकारी भवितुं शक्यते। एवमेव राज्यस्तरीय-प्रशासनिक अधिकारी अपि। केचन दिल्ली उच्चन्यायालयस्य मुख्यन्यायाधीशाः अपि संस्कृतज्ञाः आसन्।
**चिकित्सा-**पञ्चवर्षीय आयुर्वेदाचार्यस्य पाठ्यक्रमे प्रवेशं लब्ध्वा चिकित्साक्षेत्रे कार्यं कर्तुं शक्नुवन्ति । तत्समकक्षता एमबीबीएस इव भवति।
**सैनिकक्षेत्रम्**-सेनायां धर्मगुरोः इति पदं नायबसूबेदाररैंक समं भवति। संस्कृतविषयेण सह उत्तीर्णः कोऽपि स्नातकः तत्सम्बन्धिपरीक्षाम् उत्तीर्य धर्मगुरुपदे नियुज्यते।

**प्रसारणक्षेत्रम्-**
**(क) आकाशवाणी-** आकाशवाणीतः (रेडियो) अनेके कार्यक्रमाः बहुकालादेव प्रचलिताः सन्ति । प्रतिदिनं वयं प्रातः सायं च संस्कृत-वार्तानां प्रसारणं शृणुमः । वार्तानां (समाचाराणां ) भाषा सामान्या शुद्धा, स्पष्टा, जनसामान्यैः (दशमकक्षापर्यन्तं पठितैः जनैः अपि) श्रुत्वाऽपि ग्राह्या भवेत् इति ।
**(ख) दूरदर्शनम् -** एवमेव वयं दूरदर्शनेऽपि तत्र प्रातः 6.55 - 7.00 वादनं यावत् संस्कृतसमाचारान् अपि शृणुमः पश्यामः च। तत्र वाचकः प्रत्यक्षं दृश्यते अतः तस्य भाषा न केवलं शुद्धा, स्पष्टाक्षरा, लय - भावपूर्णा च भवति अपि तु तस्य एका विशिष्टा शैली अपि भवति ।

**संस्कृतपत्रकारिता-**
संस्कृत-पत्र-पत्रिकाणां प्रकाशनमपि 'प्रयोजनमूलकमेव प्रसारणे श्रव्यस्य दृश्यस्य च प्राधान्यं भवति । परं पत्र-पत्रिकाणां भाषाशैली श्रव्यभाषायाः भिन्ना एव भवति । अत्र लेखनकौशलस्य प्राधान्यं भवति । संस्कृत-पत्रिकाणां भाषाऽपि विषयानुरूपा, सरला, रुचिकरा, सर्वजनबोध्या च भवति।

**आवश्यकोऽयं ज्ञानम्**
- संस्कृतं प्रयोजनमूलकभाषा अस्ति ।
- क्षेत्रशः संस्कृतभाषायाः विविधानि प्रयोजनानि सन्ति ।
- स्वरूपदृष्ट्या संस्कृतस्य द्वे रूपे वैदिकसंस्कृतं लौकिकसंस्कृतं च ।
- विषयगतसंस्कृतम् अपि भिन्नं भिन्नमेव ।

- संस्कृतज्ञानां कृते जीवन निर्वाहाय पर्याप्ताः अवसराः सन्ति ।

- संस्कृतपत्र-पत्रिकासु ज्ञानविज्ञानमयाः लेखाः, विज्ञापनं, मनोरञ्जनं, खेलवृत्तं, व्यंग्यचित्राणि च भवन्ति ।

**योग्यतां वर्धयत**

किमपि वस्तु कापि क्रिया, कोऽपि व्यवहारः सर्वमेव प्रयोजनमूलकम् एव भवति। प्रयोजनं विना तु मन्दः अपि न प्रवर्तते । एकस्य वस्तुनः, क्रियायाः वा प्रयोजनम् एकम् अनेकं वा भवितुं शक्नोति । यदा भवान् जलपूरितं किमपि पात्रं नीत्वा विद्यालयं भ्रमणाय वा गच्छति, तदा जलस्य उपयोगः तु पिपासा-शान्त्यर्थम्/ मुखधावनार्थम्, वस्त्रपतित-दोष-धावनार्थम्, फलप्रक्षालनार्थम् दुर्घटनाग्रस्तस्य मूर्च्छितजनस्य नेत्रयोः सिंचनाय, वा भवितुं शक्यते । एवं हि परिस्थितिवशात् जलस्य विविधप्रयोजनानि वयं पश्यामः। एवमेव भाषायाः अपि क्षेत्रवशात् विविधानि प्रयोजनानि भवन्ति।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।